## ( ख ) समासप्रकरणम् –

समसनं समासः अथवा अनेकपदानाम् एकपदीभवनं समासः अर्थात् यदा अनेकपदानि मिलित्वा एकपदं जायन्ते तदा सः समासः इति कथ्यते। सम् उपसर्गपूर्वकात् अस् धातोः घञि प्रत्यये कृते 'समासः' इति शब्दो निष्पद्यते। समासशब्दस्य अर्थः संक्षिप्तीकरणमिति अस्ति।

समासः पञ्चधा। विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः समासः। प्रायेण उत्तरपदार्थप्रधानस्तत्पुरुषः तृतीयः समासः। तत्पुरुषभेदः कर्मधारयः। कर्मधारयभेदो द्विगुः। प्रायेण-अन्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः समासः। प्रायेण-उभयपदार्थप्रधानः द्वन्द्वः समासः पञ्चमः। एवं समासः पञ्चधाः।

### ( १ ) केवलसमासः –

| | | |
|---|---|---|
| पूर्वं भूतः | = | भूतपूर्वः |
| वागर्थौ इव | = | वागर्थाविव |

### ( २ ) अव्ययीभावसमासः

यदा विभक्ति-इत्यादिषु अर्थेषु वर्तमानम् अव्ययं पदं सुबन्तेन सह नित्यं समस्यते तदा असौ अव्ययीभावसमासो भवति। अथवा इदमत्र अवगन्तव्यम् –

(क) अस्य समासस्य प्रथमशब्दः अव्ययं द्वितीयश्च संज्ञाशब्दो भवति।

(ख) अव्ययशब्दार्थस्य अर्थात् पूर्वपदार्थस्य प्रधानता भवति।

(ग) समासस्य पदद्वयं मिलित्वा अव्ययं भवति।

(घ) अव्ययीभावसमासः नपुंसकलिङ्गस्य एकवचने भवति। यथा–

| विग्रह | अव्ययपदम् | अव्ययस्यार्थः | समस्तपदम् |
|---|---|---|---|
| हरौ इति | अधि | सप्तमीविभक्त्यर्थे | अधिहरि |
| कृष्णस्य समीपम् | उप | समीपार्थे | उपकृष्णम् |
| मद्राणां समृद्धिः | सु | समृद्धि अर्थे | सुमद्रम् |
| यवनानां व्यृद्धि | दुर् | दुर्गतिः अर्थे | दुर्यवनम् |
| मक्षिकाणाम् अभावः | निर् | अभावार्थे | निर्मक्षिकम् |
| हिमस्य अत्ययः | अति | समाप्त्यर्थे | अतिहिमम् |
| निद्रा सम्प्रति न युज्यते | अति | अनुचितार्थे | अतिनिद्रम् |
| हरिशब्दस्य प्रकाशः | इति | शब्द-प्रादुर्भावः | इतिहरि |
| विष्णोः पश्चात् | अनु | पश्चात् | अनुविष्णु |
| रूपस्य योग्यम् | अनु | योग्यतार्थे | अनुरूपम् |
| दिनं दिनं प्रति | प्रति | वीप्सार्थे | प्रतिदिनम् |

## ( ३ ) तत्पुरुष समासः –

तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्रधानता भवति। यथा– राज्ञः पुरुष– राजपुरुषः। अत्र उत्तरपदं पुरुषः अस्ति तस्य एव प्रधानता अस्ति। 'राजपुरुषम् आनय' इति उक्ते सति पुरुषः एव आनीयते न तु राजा। तत्पुरुषसमासे पूर्वपदे या विभक्तिः भवति प्रायेण तस्याः नाम्ना एव समासस्य नाम भवति यथा –

| | | | |
|---|---|---|---|
| **( द्वितीयातत्पुरुषः )** | कृष्णं श्रितः | = | कृष्णश्रितः |
| | दुःखम् अतीतः | = | दुःखातीतः |
| | नरकं पतितः | = | नरकपतितः |
| | ग्रामं गतः | = | ग्रामगतः |
| | स्वर्गं गतः | = | स्वर्गगतः |
| | सुखं प्राप्तः | = | सुखप्राप्तः |
| **( तृतीयातत्पुरुषः )** | शङ्कुलया खण्डः | = | शङ्कुलाखण्डः |
| | हरिणा त्रातः | = | हरित्रातः |
| | धान्येन अर्थः | = | धान्यार्थः |
| | पुण्येन अर्थः | = | पुण्यार्थः |
| **( चतुर्थीतत्पुरुषः )** | भूतेभ्यः बलिः | = | भूतबलिः |
| | यूपाय दारु | = | यूपदारु |
| | गोभ्यः हितम् | = | गोहितम् |
| | गोभ्यः सुखम् | = | गोसुखम् |
| **( पञ्चमीतत्पुरुषः )** | चोराद् भयम् | = | चोरभयम् |
| | गुरोः भीतः | = | गुरुभीतः |
| **( षष्ठीतत्पुरुषः )** | राज्ञः पुरुषः | = | राजपुरुषः |
| **( सप्तमीतत्पुरुषः )** | अक्षेषु शौण्डः | = | अक्षशौण्डः |
| | विद्यायाम् निपुणः | = | विद्यानिपुणः |

## कर्मधारयः –

यदा तत्पुरुषसमासस्य द्वयोः पदयोः एकविभक्तिः अर्थात् समानविभक्तिः भवति तदा सः समानाधिकरण तत्पुरुषसमासः कथ्यते। अयमेव समासः कर्मधारय इति नाम्ना ज्ञायते। अस्मिन् समासे साधारणतया पूर्वपदं विशेषणम् उत्तरपदश्च विशेष्यं भवति। यथा– नीलम् कमलम् = नीलकमलम्

( क ) अस्मिन् उदाहरणे नीलम् कमलम् इति द्वयोः पदयोः समानविभक्तिः अर्थात् प्रथमा विभक्तिः अस्ति।

( ख ) अत्र नीलम् इति पदं विशेषणम् कमलम् इति पदं च विशेष्यम्। अत एव अयं कर्मधारयः समासः अस्ति।

## विशेषण-विशेष्यकर्मधारयः –

पीतम् अम्बरम् इति = पीताम्बरम्

| | | | |
|---|---|---|---|
| | रक्तम् कमलम् इति | = | रक्तकमलम् |
| | वीरः पुरुषः इति | = | वीरपुरुषः |
| | दीर्घा रज्जुः इति | = | दीर्घरज्जुः |
| | कुत्सितः राजा इति | = | कुराजा |
| | महान् पुरुषः इति | = | महापुरुषः |
| | कृष्णः सर्पः | = | कृष्णसर्पः |
| **उपमानोपमेय कर्मधारयः–** | घनः इव श्यामः इति | = | घनश्यामः |
| | कर्पूर इव गौरः | = | कर्पूरगौरः |
| | चन्द्रः इव मुखम् | = | चन्द्रमुखम् |
| | शैल इव उन्नतः इति | = | शैलोन्नतः |
| | वज्रम् इव कठोरम् इति | = | वज्रकठोरम् |
| **नञ् तत्पुरुषः –** | न ब्राह्मणः | = | अब्राह्मणः |
| | न अश्वः | = | अनश्वः |
| **उपमानोत्तरपद कर्मधारयः –** | | | |
| | पुरुषः व्याघ्रः इव | = | पुरुषव्याघ्रः |
| | पुरुषः सिंहः इव | = | पुरुषसिंहः |
| | पुरुषः ऋषभः इव | = | पुरुषर्षभः |
| | करः किसलयम् इव | = | करकिसलयम् |
| | मुखम् कमलम् इव | = | मुखकमलम् |
| **अवधारणापूर्वपद कर्मधारयः –** यथा – | | | |
| | तपः एव धनम् | = | तपोधनम् |
| | विद्या एव धनम् | = | विद्याधनम् |
| | गुरुः एव देवः | = | गुरुदेवः |
| | वेदः एव सम्पत् | = | वेदसम्पत् |
| **उपपद तत्पुरुषः –** | कुम्भं करोति | = | कुम्भकारः |
| | सूत्रं करोति | = | सूत्रकारः |
| **कुसंज्ञकतत्पुरुषः –** | कुत्सितः पुरुषः | = | कुपुरुषः |

**द्विगुसमासः** – 'संख्यापूर्वो द्विगु' इति पाणिनीयसूत्रानुसारं यदा कर्मधारयसमासस्य पूर्वपदं संख्यावाची उत्तरपदञ्च संज्ञावाची भवति तदा सः 'द्विगुसमासः' कथ्यते। अयं समासः प्रायः समूहार्थे भवति। समस्तपदं सामान्यतया नपुंसकलिङ्गस्य एकवचने अथवा स्त्रीलिङ्गस्य एकवचने भवति। यथा –

| | | |
|---|---|---|
| त्रयाणां भुवनानां समाहारः इति | = | त्रिभुवनम् |
| पञ्चानां पात्राणां समाहारः इति | = | पञ्चपात्रम् |
| चतुर्णां युगानां समाहारः इति | = | चतुर्युगम् |

**कुत्रचित् द्विगुसमासः ईकारान्तस्त्रीलिङ्गेऽपि भवति यथा –**

| | | |
|---|---|---|
| पञ्चानां वटानां समाहारः इति | = | पञ्चवटी |
| अष्टानाम् अध्यायानां समाहारः इति | = | अष्टाध्यायी |
| सप्तानां शतानां समाहारः इति | = | सप्तशती |
| शतानाम् अब्दानां समाहारः इति | = | शताब्दी |

**(४) बहुव्रीहिसमासः** – '**अनेकमन्यपदार्थे**' । यस्मिन् समासे यदा अन्यपदार्थस्य प्रधानता भवति तदा सः बहुव्रीहिसमासः कथ्यते। अर्थात् न तु पूर्वपदार्थस्य प्रधानता भवति न हि उत्तरपदार्थस्य प्रत्युत द्वौ अपि पदार्थौ मिलित्वा अन्यपदार्थस्य बोधं कारयतः। यथा –

**समानाधिकरण-बहुव्रीहिः –**

| | | |
|---|---|---|
| कण्ठे कालः यस्य सः | = | कण्ठेकालः |
| प्राप्तम् उदकं यं सः | = | प्राप्तोदकः (ग्रामः) |
| हताः शत्रवः येन सः | = | हतशत्रुः (राजा) |
| दत्तं भोजनं यस्मै सः | = | दत्तभोजनः (भिक्षुकः) |
| पतितं पर्णं यस्मात् सः | = | पतितपर्णः (वृक्षः) |
| दश आननानि यस्य सः | = | दशाननः (रावणः) |
| वीरा पुरुषाः यस्मिन् (ग्रामे) सः | = | वीरपुरुषः (ग्रामः) |
| चत्वारि मुखानि यस्य सः | = | चतुर्मुखः (ब्रह्मा) |

**व्यधिकरणबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्रः शेखरे यस्य सः | = | चन्द्रशेखरः (शिवः) |
| चक्रं पाणौ यस्य सः | = | चक्रपाणिः (विष्णुः) |
| शूलं पाणौ यस्य सः | = | शूलपाणिः (शिवः) |
| धनुः पाणौ यस्य सः | = | धनुष्पाणिः (रामः) |

**तुल्ययोगेबहुव्रीहिः –**

| | | |
|---|---|---|
| पुत्रेण सहितः | = | सपुत्रः |
| बान्धवैः सहितः | = | सबान्धवः |
| विनयेन सह विद्यमानम् | = | सविनयम् |
| आदरेण सह विद्यमानम् | = | सादरम् |
| पत्न्या सह वर्तमानः | = | सपत्नीकः (वशिष्ठः) |

**उपमानवाचकबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्र इव मुखं यस्याः सा | = | चन्द्रमुखी |
| पाषाणवत् हृदयं यस्य सः | = | पाषाणहृदयः |

## (५) द्वन्द्वसमासः –

'**चार्थे द्वन्द्वः**' अर्थात् द्वन्द्वसमासे परस्परं साकांक्षयोः पदयोः मध्ये 'च' आगच्छति, अतएव द्वन्द्वसमासः उभयपदार्थप्रधानः भवति। यथा– धर्मः च अर्थः च– धर्मार्थौ। अत्र पूर्वपदं धर्मः उत्तरपदम् अर्थः अनयोः द्वयोः अपि प्रधानता अस्ति। द्वन्द्वसमासे समस्तपदं प्रायशः द्विवचने बहुवचने वा भवति।

उदाहरणानि–

**इतरेतर द्वन्द्वः–**

| | | |
|---|---|---|
| हरिश्च हरश्च | = | हरिहरौ। |
| ईशश्च कृष्णश्च | = | ईशकृष्णौ |
| व्यासश्च कपिलश्च | = | व्यासकपिलौ |
| रामश्च श्यामश्च मोहनश्च | = | रामश्याममोहनाः |
| शिवश्च केशवश्च | = | शिवकेशवौ |
| माता च पिता च | = | मातापितरौ |

**एकशेष द्वन्द्वः–** माता च पिता च = पितरौ

**समाहारद्वन्द्वः–** समाहार (समूहः) अर्थे द्वन्द्वसमासस्य प्रायेण नपुंसकलिङ्गे एकवचने प्रयोगः भवति। यथा –

| | | |
|---|---|---|
| पाणी च पादौ च एषां समाहारः | = | पाणिपादम् |
| शिरश्च ग्रीवा च अनयोः समाहारः | = | शिरोग्रीवा |
| रथिकाश्च अश्वारोहाश्च एषां समाहारः | = | रथिकाश्वरोहम् |
| वाक् च त्वक् च अनयोः समाहारः | = | वाक्त्वचम् |
| छत्रं च उपानह् च अनयोः समाहारः | = | छत्रोपानहम् |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः-

(१) अव्ययीभावसमासस्य उदाहरणम् अस्ति-

(क) यथामति (ख) पापपुण्यौ

(ग) राजपुरुषः (घ) पंचवटी ( )

(२) कर्मधारयसमासस्य उदाहरणम् अस्ति-

(क) रामकृष्णौ (ख) पीताम्बरः

(ग) सुमद्रम् (घ) शताब्दीः ( )

(३) घनश्यामः इति पदे समासः अस्ति -

(क) बहुव्रीहिः (ख) कर्मधारयः

(ग) अव्ययीभावः (घ) द्विगुः ( )

(४) बहुव्रीहिसमासस्य उदाहरणम् अस्ति-

(क) महापुरुषः (ख) चतुर्युगः

(ग) उपकृष्णम् (घ) कण्ठेकालः ( )

(५) द्वन्द्वसमासस्य उदाहरणम् अस्ति-

(क) भ्रातरौ (ख) दशपात्रम्

(ग) अनुरथम् (घ) महापुरुषः ( )

**(क) निम्नलिखितपदानां समासविग्रहः कर्तव्यः -**

कृष्णसर्पः -
सेवाधर्मः -
प्रतिदिनम् -
नरोत्तमः -
महाशयः -
पापमुक्तः -
अप्रियः -
अनिष्टः -
जलमग्नः -
शिवालयः -
कुपुत्रः -

**( ख ) निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लेखनीयम् –**

| समस्तपदम् | विग्रहः | समासस्य नाम |
| --- | --- | --- |
| अनुरथम् | | |
| सप्तपदी | | |
| भुक्तभोगः | | |
| धर्मभ्रष्टः | | |
| मासोनः | | |
| धर्मार्थौ | | |
| सप्तशती | | |
| विद्याहीनः | | |

**( ग ) निम्नलिखितविग्रहवाक्यानां समासः करणीयः –**

समान उदरो यस्य –

मुखं कमलम् इव –

पुत्रीश्च पुत्रश्च –

शोभनः पुरुषः –

देवेन दत्तः –

रूपस्य योग्यम् –

तेन कृतम् –

**( घ ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| क खण्डः | ख खण्डः |
| --- | --- |
| द्वन्द्वसमासः | शताब्दी |
| बहुव्रीहिसमासः | उपवनम् |
| अव्ययीभावसमासः | कुसुमकोमलम् |
| द्विगुसमासः | शूलपाणिः |
| कर्मधारयसमासः | नरश्रेष्ठः |
| तत्पुरुषसमासः | रामलक्ष्मणौ |

**उत्तरमाला– वस्तुनिष्ठप्रश्नाः**

(१) क (२) ख (३) ख (४) घ (५) क

❀ ❀ ❀